# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-II Examination, 2020

## SANSKRIT

## PAPER-III

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*

### क–विभाग

1. कस्यापि एकस्य प्रश्न समाधेयम्– 10×1 = 10

(क) ऋग्वेदस्य दार्शनिकसूक्तानां सोदाहरणं व्याख्या कार्या।

(ख) आरण्यकोपनिषदमाधारीकृत्य प्रबन्धः लेखनीयः।

(ग) ऋग्वैदिकसमाजव्यवस्थां संस्कृतिं चाधारीकृत्य नातिदीर्घः प्रबन्धो लेखनीयः।

(घ) सामवेदस्य सम्बन्धे प्रबन्धः लेखनीयः।

2. कस्यापि एकस्य टिप्पणी कार्या– 5×1 = 5

ब्राह्मण, कठोपनिषद्, श्रौतसूत्रम्, शिक्षा, अथर्ववेदः।

अथवा

संक्षिप्तोत्तरं लेखनीयम् (द्वयोः)– $2\frac{1}{2}\times2 = 5$

(क) कति वेदाङ्गानि ? तेषां नामानि लिखत।

(ख) ऋग्वेदस्य संवादसूक्तस्य नामद्वयं लिखत।

(ग) ऋग्वेदस्योपनिषदां नामानि लिखत।

(घ) यजुर्वेदस्य कति भेदाः।

(ङ) शतपथ-ब्राह्मण–शाखानां नामानि लिखत।

(च) वैदिक–छन्दसः नामानि लिखत।

### ख–विभाग

3. कस्याप्येकस्य उत्तरं संस्कृतभाषायां लेखनीयम्– 10×1 =10

(क) संस्कृतगद्यसाहित्ये का नाम 'त्रयी' ? संस्कृतगद्यसाहित्ये बाणभट्टस्य स्थानमालोचनीयम्।

(ख) भारतीयसंस्कृतौ साहित्ये च पुराणस्य प्रभावः आलोचनीयः।

(ग) भारतीयसंस्कृतौ साहित्ये च रामायणस्य प्रभावः आलोचनीयः।

(घ) भवभूतिविरचितानां नाटकानां परिचयो देयः।

4. टिप्पणी कार्या (एकस्य)– 5×1 = 5

हितोपदेशः, मुद्राराक्षसम्, श्रीमद्भगवद्गीता, कालिदासः।

अथवा

5. अतिसंक्षिप्तोत्तरं लेखनीयम् (द्वयोः)– $2\frac{1}{2}\times2 = 5$

(क) प्राकृतभाषाया विरचितस्य एकस्य नाटकस्य नाम लिखत। तत्र कति अङ्का सन्ति ?

(ख) भासस्य रामायणाश्रितानां नाटकानां नामानि लिखत।

(ग) 'कादम्बरीकाव्यं कः रचितवान् ? कादम्बरी कथा–आख्यायिका वा ?

(घ) किं तावत् द्विसन्धानकाव्यम् ?

(ङ) महाभारतस्य पर्वसंख्यामुल्लिख्य पञ्चानां नामानि लेखनीयानि।

## ग–विभाग

6. एकः प्रश्नः समाधेयः – 10×1 = 10

(क) आयुर्वेदशास्त्रमधिकृत्य प्रबन्धमेकं लिखत।

(ख) प्राचीनभारतस्य छन्दःशास्त्रमधिकृत्य नातिदीर्घः प्रबन्धः लेखनीयः।

अथवा

7. टिप्पणी कार्या (द्वयोः)– 5×2 = 10

घनुर्वेदसंहिता, ब्रह्मगुप्तः, अमरकोषः

## घ–विभाग

8. एकः प्रश्नः समाधेयः – 10×1 = 10

(क) संस्कृतसाहित्यं प्रति बङ्गीयानामवदानं सम्यग् आलोचयत।

(ख) ऊनविंशशतके पश्चिमबङ्गेषु विरचितानां काव्यनाटकादीनां विवरणमुपस्थाप्यताम्।

अथवा

9. टिप्पणी कार्या (द्वयोः)– 5×2 = 10

(क) शैवली

(ख) गदाधरविवाहकथा

(ग) निवेदित–निवेदितम्

(घ) राग–विरागम्

(ङ) देशवन्धु–देशप्रियम्।

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-II Examination, 2020

## SANSKRIT

## PAPER-IV (New Syllabus)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*

### एकक–१

1. संस्कृतभाषया एकस्योत्तरं प्रदेयम् – 12

(क) कस्तावद् संस्कारः ? मनुमतानुसारेण द्विजातीनां संस्कारविषय आलोच्यताम्।

(ख) मनोर्मतानुसारेण कस्तावद् 'धर्मः' ? द्विजातीनां धर्मविषये नातिदीर्घः कश्चित् प्रबन्धः लिख्यताम्।

अथवा

2. **(I)** संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 8

(क) संकल्पमूलः कामो वै यज्ञाः संकल्प सम्भवाः।
व्रता नियमधर्माश्च सर्वे संकल्पगाः स्मृताः।।

(ख) जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः।
कुर्यादन्यत्र वा कुर्यान्मैत्रो ब्राह्मणउच्यते।।

**(II)** द्वयोः उत्तरं प्रदेयम् – 2×2 = 4

(क) कस्मात् आचारः शिक्षणीयः ?

(ख) उपाध्यायः कः उच्यते ?

(ग) कानि एकादश इन्द्रियाणि ?

(घ) को नाम सदाचारः ?

### एकक–२

3. एकस्योत्तरं प्रदेयम्– 10

(क) कति प्रमाणानि याज्ञवल्क्येन स्वीकृतानि ? तानि सविशदम् आलोच्यन्ताम्।

(ख) किं तावत् स्त्रीधनम् ? स्त्रीधनविषये याज्ञवल्क्यस्य विधानं सम्यग् आलोच्यताम्।

अथवा

4. **(I)** एकस्य टिप्पणी कार्या– 4×1 = 4

क्रीतानुशयः, आधिः, व्यवहारः, निधिः।

**(II)** अधोलिखितेषु द्वयोः संक्षिप्तमुत्तरं प्रदेयम्– 3×2 = 6

(क) दायः शब्दस्य कोऽर्थः ?

(ख) कस्तावद् स्तेयः ?

(ग) कस्तावद् प्रतिभूः ?

(घ) को नाम अरिषड्वर्गः ?

एकक–३

5. एकस्योत्तरं प्रदेयम्– 12

(क) अमात्योत्पत्तिविषये कौटिल्यस्य मतं आलोच्यताम्।

(ख) कौटिल्यमतानुसारेण विद्या कतिविधा ? तासां स्वरूपम् उपयोगिता च सम्यग् आलोच्यताम्।

अथवा

6. **(I)** बङ्गभाषया आङ्गलभाषया च अनुवादः कार्यः (द्वयोः) 4×2 = 8

(क) प्रदीपः सर्वाविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।

(ख) सहाध्यायिनो अमात्यान् कुर्वीत दृष्टशौच–
सामर्थ्यात् इति भारद्वाजः। ते ह्यस्य
विश्वास्याः भवन्तीति। नेति विशालाक्षः।
सहक्रीडितत्वात् परिभवन्त्येनम्।

(ग) चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्रमसु।।

**(II)** द्वयोः टिप्पणी कार्या – 2×2 = 4

प्राड्विवाक्, दण्डपारूष्यम्, वृद्धिः, साहसः

एकक–४

7. अधोलिखितेषु द्वयोः व्याख्या कार्या – 5×2 = 10

अचो यत्, गर्गादिभ्यो यञ्, कालसमयवेलासु तुमुन्, तस्यापत्यम्

8. **(I)** कस्यविभागाद् द्वयं समादाय साकल्येन त्रयाणां संसूत्रं पदसाधनं क्रियताम्– 3×2 = 6

क–विभाग

एधितव्यम्, कर्ता, धनदः

ख–विभाग

मीमांसकः, अमात्यः, पाणिनीयम्

ग–विभाग

इन्द्राणी, गौरी, कारिका

अथवा

**(II)** प्रतिविभागाद् एकैकं समादाय साकल्येन त्रयाणां परिणतरूपं लिख्यताम्– 2×3 = 6

क–विभाग

तृ + तुमुन्, कृ + ण्वुल्, चि + यत्

ख–विभाग

गङ्गा + ढक्, गर्ग + यञ्, दशरथ + इञ्

ग–विभाग

अज + टाप्, रात्रि + ङीष्, मनुष्य + ङीप्

अथवा

**(III)** एकस्योत्तरं प्रदेयम्– 6

(क) लघुसिद्धान्तकौमुद्यनुसारं स्त्री प्रत्ययानां प्रयोगविषयः लिख्यताम्।

(ख) लघुसिद्धान्तकौमुद्यनुसारं 'सत्'–प्रत्ययस्य प्रयोग आलोच्यताम्।

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2020

## SANSKRIT

## PAPER-V (New Syllabus)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*

***The word limit mentioned below against each question to be strictly followed by the students:***
***2 marks-30 words / 4 marks-60 words / 5 marks-100 words /6 marks-150 words /***
***8 marks-220 words / 10 marks-300 words / 12 marks-325 words.***

### विभाग–क

1. एकस्योत्तरं संस्कृतभाषया प्रदेयम् – 10×1 = 10

(क) काव्यादर्शानुसारं काव्यकारणमालोच्यताम्।

(ख) दण्डिमतानुसारेण काव्यं कतिविधम् – तत् सविस्तरम् आलोचयत।

(ग) कथा–आख्यायिकयोः भेदं काव्यादर्शानुसारम् आलोचयत।

(घ) व्याख्येयम् (द्वयोः)– 5×2 = 10

(i) कन्ये कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योऽयमर्थात्मा वैरस्यायास्य प्रकल्पते।।

(ii) इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः।
एषां विपर्ययो प्रायः दृश्यते गौडवर्त्मनि।।

(iii) गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति।।

### विभाग–ख

2. एकस्योत्तरं समाधेयम् – 10×1 = 10

(क) सलक्षणं सोदाहरणं च आलोचयत (द्वयोः)– 5×2 = 10

यमकम्; निदर्शना; व्यतिरेकः; भ्रान्तिमान्।

(ख) प्रभेदः निर्णेयः (द्वयोः)– 5×2 = 10

(i) रूपक – परिणामयोः

(ii) दृष्टान्त – प्रतिवस्तूपमयोः

(iii) उपमा – उत्प्रेक्षयोः

(iv) विशेषोक्ति – विभावनयोः

(ग) एकमलंकारमवलम्ब्य संक्षिप्तः प्रबन्धः लिखत– 10

श्लेषः; अनुप्रासः; अर्थान्तरन्यासः।

(घ) श्लोकार्थमालोच्य अलंकारः निर्णीयताम् (द्वयोः)– 5×2 = 10

(i) कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति वत यस्य।।

(ii) क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम्।
विरम प्रसीद सुन्दरि! यौवनमनिवर्ति यातं तु।।

(iii) प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः।।

(iv) धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः।।

## विभाग–ग

3. <u>एकस्योत्तरं</u> प्रदेयम्– 12

(क) भट्टिकाव्यस्य द्वितीयसर्गानुसारं रामचन्द्रेण मारीचबधवृत्तान्तमालोचयत।

(ख) भट्टिकाव्यम् कथम् उदाहरणकाव्यमित्युच्यते ? आलोच्यताम्।

अथवा

4. (I) संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या (एकस्य)– 8

(क) बलिर्बबन्धे जलधिर्ममन्थे जह्रेऽमृतं दैत्यकुलं विजिग्ये।
कल्पान्तदुःस्था वसुधा तथोहे येनैष भारोऽतिगुरुर्न तस्य।।

(ख) दत्तावधानं मधुलेहिगीतौ प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान् लक्ष्ये समाधिं न दधे मृगावित्।।

(II) मातृभाषया आङ्गलभाषया वा अनुवादः कार्यः (एकस्य)– 4

(क) न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः।।

(ख) तरङ्गसङ्गाच्चपलैः पलाशैर्ज्वालाश्रियं सातिशयं दधन्ति।
सधूमदीप्ताग्निरुचीनि रेजुस्ताम्रोत्पलान्याकुलषट्पदानि।।

5. प्रश्नत्रयं समाधेयम्– 2×3 = 6

(क) भट्टिकाव्ये कति काण्डाः सन्ति ? तेषां नामानि लिखितव्यानि।

(ख) काकुत्स्थः कः ?

(ग) विश्वामित्रेण रामाय के विद्ये प्रदत्ते ?

(घ) "व्रजन्ति तेषां दयसे न कस्मात्"–
केन कं प्रति इदमुक्तम् ? कथं तेनेदमुक्तम् ?

(ङ) भट्टिकाव्यस्य नामान्तरं किम् ?

## विभाग–घ

6. एकस्योत्तरं समाधेयम्– 12×1 = 12

(क) संस्कृतालंकारशास्त्रे वामनस्य अवदानमालोच्यताम्।

(ख) संस्कृतालंकारशास्त्रे कुन्तकस्यावदानमालोच्यताम्।

(ग) ध्वनिवादस्य कः प्रवक्ता ? तस्य ग्रन्थनाम किम् ? संस्कृतालंकारशास्त्रानुसारं ध्वनितत्त्वविषयं विशदमालोचयत।

(घ) टिप्पणी लेखनीया (द्वयोः) 6×2 = 12

दण्डी; धनञ्जयः; विश्वनाथः; भरतः।

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2020

## SANSKRIT

## PAPER-VI (New Syllabus)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*

***The word limit mentioned below against each question to be strictly followed by the students:***
***2 marks-30 words / 2.5 marks-40 words / 3 marks-50 words / 4 marks-60 words / 5 marks-100 words /***
***6 marks-150 words / 10 marks-300 words / 12 marks-325 words.***

### विभाग–क

1. व्याख्या कार्या (द्वयोः)– 5×2 = 10

(क) आप्तवाक्यं शब्दः।

(ख) ज्ञानाधिकरणमात्मा।

(ग) सुखाद्यनुपलब्धिसाधनमिन्द्रियं मनः।

(घ) तद्वति तत्प्रकारकोऽनुभवो यथार्थः।

(ङ) आकाङ्क्षादिरहितं वाक्यमप्रमाणम्।

(च) अनादिः सान्तः प्रागभावः।

2. एकस्योत्तरं समाधेयम् – 12×1 = 12

(क) प्रतिपदव्यावृत्तिपुरःसरम् अन्नंभट्टकृतं विशेषलक्षणमालोच्यताम्। विशेषस्य स्वीकारे का युक्तिः ? कुत्र कुत्र विशेषः वर्तते ? विशेषे विशेषस्वीकारे का हानि, सयुक्तिकमालोच्यताम्। 4+3+2+3 =12

(ख) हेत्वाभासशब्दस्य कोऽर्थः ? कति हेत्वाभासाः अन्नंभट्टेन स्वीकृताः ? के च ते ? तेषु त्रयां सोदाहरणमालोचयत। 2+2+2+6 =12

(ग) किं नाम कारणम् ? कारणस्य कति भेदाः अन्नंभट्टेन स्वीकृताः ? के च ते ? तेषु यथेच्छं द्वयं सोदाहरणमालोचयत। 2+2+2+6 =12

3. वैधता निरूपणीया (एकस्य)– 3×1 = 3

(क) शशको हिंस्रः विषाणित्वात्।

(ख) पर्वतो वह्निमान् प्रमेयत्वात्।

(ग) वह्निरनुष्णो द्रव्यत्वात्।

(घ) बन्ध्यापुत्रः सुन्दरः पुत्रत्वात्।

4. द्वयोः संक्षिप्तोत्तरं प्रदेयम् – 2.5×2 = 5

(क) तर्कसंग्रहानुसारं गुणाः कतिविधाः ?
यथाक्रमं पञ्चानां नामानि लिखत।

(ख) तर्कसंग्रहानुसारं सन्निकर्षः कतिविधः ?
नामानि लेखनीयानि।

(ग) वाक्यार्थज्ञाने को हेतुः ?

(घ) तर्कसंग्रहानुसारं समवायः कतमः पदार्थः ?
किं तावद् समवायस्य लक्षणम् ?

(ङ) कति कर्माणि अन्नंभट्टेन स्वीकृतानि ? नामानि लिखत।

(च) को नाम प्रध्वंसाभावः ? उदाहरणं देयम्।

(छ) तर्कसंग्रहे तर्कशब्दस्य कोऽर्थः ?

## विभाग–ख

5. एकस्य प्रश्नयोः उत्तरं देयम् – 10×1 = 10

(क) भारतीयदर्शने आत्मनः स्थानमालोचनीयम्।

(ख) को नाम योगः ? योगस्य कति अङ्गानि ? तेषां विवरणं सविस्तरमालोच्यताम्।

(ग) बौद्धदर्शनस्य कति संप्रदायाः ? के च ते ? तेषां विवरणं सविशदमालोचयत।

(घ) रामानुजः कः ? भारतीयदर्शनं प्रति तस्याव दानं सम्यगालोचनीयम्।

6. एकस्य संस्कृतभाषया टिप्पणी कार्या– 5×1 = 5

स्याद्वादः; जडवादः; अनेकान्तवादः; सत्कार्यवादः।

## विभाग–ग

7. द्वयोः समाधेयाः– 2.5×2 = 5

(क) किं नाम CC (Catalogus Catalogorum)

(ख) दक्षिणभारते प्रचलितायाः लिप्याः नाम किम् ?

(ग) पाण्डुलिपिरचनायाः प्रधानानि उपादानानि कानि ?

(घ) 'Manuscriptology' इतिशब्दस्य ब्युत्पत्त्रिः दर्शनीया।

(ङ) शकाब्दः केन प्रचलितः ?

(च) का नाम गिल्गिट्पाण्डुलिपिः ?

(छ) पाण्डुलिपि–शिलालेखयोः स्वरूपगतं पार्थक्यं किम् ?

(ज) का पाण्डुलिपिपदवाच्या ?

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2020

## SANSKRIT

## PAPER-VII (New Syllabus)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*

***The word limit mentioned below against each question to be strictly followed by the students:***
***3 marks-50 words / 4 marks-60 words / 5 marks-100 words / 6 marks-150 words /***
***8 marks-220 words / 10 marks-300 words / 12 marks-325 words.***

### विभाग–क

कस्यचिदेकस्य प्रश्नस्य उत्तरं समाधेयम् – 8×1 = 8

1. संज्ञानसूक्तस्य सामाजिकगुरुत्वमालोच्यताम्। 8

अथवा

हिरण्यगर्भसूक्ते प्रतिफलितं दार्शनिक–तत्त्वमालोच्यताम्।

2. संस्कृतभाषया व्याख्या कार्या (एकस्य) – 8

(क) अग्निर्होता कविक्रतुः
सत्यश्चित्र श्रवस्तमः।
देवो देवेभिरा गमत्।।

(ख) जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा विभ्यद्धनमिच्छमानोऽ–
न्योषामस्तमुप नक्तमेति।।

3. आङ्गलभाषया वङ्गभाषया वा अनुवादः करणीयः– 8

(क) अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः।।

(ख) उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि।।

4. व्याख्या कार्या– 8

अग्निमीले इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम्।

अथवा

द्वयोः टीका प्रदेया – 4×2 = 8

याज्या; आधानम्; पुरोनुवाक्या; विनियोगः।

## विभाग–ख

5. (I) अथर्ववेदीय–भूमिसूक्तानुसारेण पृथिव्याः सौन्दर्यमालोच्यताम्। 5

(II) एकस्य अनुवादः करणीयः – 5×1 = 5

(क) या ते रूद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शान्तमया गिरिशन्ताभिचाकशीहि।।

(ख) यमिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषः जगत्।।

(ग) असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैन गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयति नः।।

## विभाग–ग

6. मनुमत्स्यकथा कस्मिन् वेदे अन्तर्भवति ? अस्याः कथायाः उत्सः गुरुत्वं च आलोचयत। 10

अथवा

शुनः शेपोपाख्यानं कुत्र दृश्यते ? उपाख्यानोऽयम् सम्यग् आलोच्यताम्।

अथवा

आङ्गलभाषया वङ्गभाषया वा द्वयोः अनुवादः कार्यः – 5×2 = 10

(क) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति।।

(ख) कलिः शयानो भवति संजिहानस्तु द्वापरः।
उत्तिष्ठस्त्रेता भवति कृतं संपद्यते चरंश्चरैवेति।।

(ग) स हास्मै वाचमुवाद। विभृहि मा पारयिष्यामि
त्वेति कस्मान्मा पारयिष्यसीत्यौघ इमाः सर्वाः
प्रजा निर्वोढा ततस्त्वा पारयितास्मीति। कथं ते भृतिरिति।

## विभाग–घ

7. बृहदारण्यकोपनिषदमनुसृत्य जीवात्मनः स्वरूपमालोचयत। 10

अथवा

बृहदारण्यकोपनिषद् कस्मिन् वेदे अन्तर्भवति ? अस्मिन् उपनिषदि वर्णितम् आत्मनः उत्क्रान्ति– विषयं सम्यगालोचयत।

अथवा

8. (I) संस्कृतभाषया व्याख्या कार्या (एकस्य)– 6

(क) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

(ख) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते नमो य उ विद्यायां रताः।।

(II) आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः (एकस्य)– 4

(क) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिश्रिताः।
अथो मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।।

(ख) स विश्वकृत् स हि सर्वस्य कर्ता।
तस्य लोकः स उ लोक एव।।

## विभाग–ङ

9. (क) पदपाठः प्रदर्श्यताम् – [Q. No. 2.(क) अथवा 3.(क)]। 6

(ख) द्वयोः व्याकरणगता व्याख्या कार्या – 3×2 = 6

(i) कविक्रतुः in Q. no. 2.(क)।

(ii) दोषावस्त in Q. no. 3.(ख)।

(iii) उप त्वाग्ने in Q. no. 3.(ख)।

अथवा

10. वैदिकसमासः अथवा लेट् प्रयोगस्य वैशिष्टयम् आलोचयत। 12

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours Part-III Examination, 2020

## SANSKRIT

## PAPER-VIII (New Syllabus)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*

***The word limit mentioned below against each question to be strictly followed by the students:***
***1 marks-20 words /2 marks-30 words / 2.5 marks-40 words / 3 marks-50 words / 4 marks-60 words / 4.5 marks-80 words / 5 marks-100 words / 13 marks-360 words / 15 marks-400 words.***

### विभाग–क

1. अधोलिखितेषु सूत्रेषु एकस्य व्याख्या कार्या– 　4×1 = 4

(क) सहयुक्तेऽप्रधाने।

(ख) जनिकर्तुः प्रकृतिः।

(ग) कर्तृकर्मणोः कृतिः।

(घ) कालाध्वनोरत्यन्तसंयोगे।

2. व्याख्या कार्या (एकस्य) – 　4×1 = 4

(क) 'विभाषा' इति योगविभागादगुणे स्त्रियां च क्वचित्!

(ख) प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा, पुष्पाणि स्पृहयति।

(ग) फलमपीह हेतुः – अध्ययनेन वसति।

(घ) हानिवदाधिक्यमपि अङ्गानां विकारः।

3. काचिदेका व्याख्या कार्या – 　2

(क) अपादान–सम्प्रदान–करणाधारकर्मणाम्।
कर्तुश्चान्योन्यसन्देहे परमेव प्रवर्तते।।

(ख) उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।

4. रेखाङ्कितानां पदानां ससूत्रं सकारणं विभक्तिनिर्णयं कुरुत (त्रयाणाम्) – 　1×3 = 3

(क) आसनात् पश्यति गुरुः।

(ख) कृती शास्त्रे।

(ग) चौरे गते कः पन्था।

(घ) दन्तयोः हन्ति कुञ्जरम्।

(ङ) दुःखेन रोदिति।

5. <u>एकस्य</u> टिप्पणी कार्या – 2

उपपदविभक्तिः; द्विकर्मकधातुः; आधारः।

## विभाग–ख

6. अधोलिखितेषु सूत्रेषु <u>त्रयाणां</u> व्याख्या कार्या– 2.5×3 = 7.5

(क) सप्तमी–विशेषणे बहुव्रीहौ।

(ख) उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।

(ग) संख्या वंश्येन।

(घ) अनेकमन्यपदार्थे।

(ङ) कतृकरणे कृता बहुलम्।

7. टिप्पणी कार्या (एकस्य) – 4.5×1 = 4.5

कर्मधारयसमासः; विग्रहः; नित्यसमासः; एकशेषः।

8. ससूत्रं पदसाधनं कुरुत (त्रयाणाम्) – 1×3 = 3

केशाकेशि; अहिनकुलम्; यथामति; चित्रगुः; सप्तगङ्गम्; कुम्भकारः।

## विभाग–ग

9. <u>एकस्योत्तरं</u> समाधेयम्– 15×1 = 15

(क) को नाम ध्वनिनियमः ? ग्रीम–ध्वनिनियमः सम्यग् आलोचनीयः। 2+13=15

(ख) वैदिक–आवेस्तयोः संबन्धम् आलोचयत। 15

(ग) संस्कृतप्राकृतयोः सम्पर्कम् आलोचयत। प्राकृतभाषायाः भेदान् उल्लिख्य सविशदम् आलोचयत। 15

(घ) टिप्पणी लेखनीया (त्रयाणाम्) – 5×3 = 15

(i) विप्रकर्षः (Anaptyxis)

(ii) विषमीभवनम् (Dissimilation)

(iii) तालव्यीभवनम् (Palatalization)

(iv) अपश्रुतिः (Ablaut)

(v) समाक्षरलोपः (Haplology)

## विभाग–घ

10. संस्कृतभाषया देवनागरीलिप्या च कमप्येकम् आधारीकृत्य निबन्धमेकं लिखत– 5

(क) ईश्वरचन्द्रविद्यासागरः।

(ख) आधुनिकसमाजे संस्कृतभाषायाः गुरुत्वम्।

(ग) छात्राणां राजनीतिचर्चा।

(घ) संगणकयन्त्रस्य सुफलं कुफलं च।

——×——